A (Printed Pages 4)

# AS-1618

## आचार्य (प्रथम सेमेस्टर) परीक्षा, 2016

### संस्कृत साहित्यम्

चतुर्थप्रश्नपत्रम्

(वेणीसंहारम्)

समयावधिः - घण्टात्रयम् सम्पूर्णाङ्काः - 70

*For Back Paper/Improvement/Exempted Candidate(s) the maximum marks will be 100.*

निर्देश : प्रथमः प्रश्नोऽनिवार्यः। प्रतिवर्गमेकः प्रश्नोऽवश्यं समाधेयः।

1. अधोलिखितेषु टिप्पणी विधेया- $3 \times 10 = 30$

(क) भानुमती।

(ख) वेणीसंहारस्य तृतीयाङ्कस्य कथा।

(ग) राक्षसः।

(घ) भट्टनारायणः।

(ङ) वेणीसंहारस्याऽर्थः

(च) विष्कम्भकः।

P.T.O.

(छ) कञ्चुकी।

(ज) फलन्ति काकतालीयं तेभ्यः प्राज्ञाः न बिभ्यति।

(झ) अत्रासितानां क्रोधान्धैर्भवत्येषा विकत्थना!

(ञ) अश्वत्थामा।

**प्रथमो वर्गः**

2. अधोलिखितस्य ससन्दर्भाव्याख्या विधीयताम् - 10

मध्नामि कौरवशतं समरे न कोपाद्
दुःशासनस्य रूधिरं न पिबाम्युरस्तः।
सञ्चूर्णयामि गदया न सुयोधनोरू
सन्धिं करोतु भवतां नृपतिः पणेन।।

3. अधोलिखितस्य व्याख्या कार्या- 10

चत्वारो वयमृत्विजः स भगवान् कर्मोदिष्टा हरिः।
सङ्ग्रामाध्वरदीक्षितो नर पतिः पत्नी गृहीतव्रता।।
कौरव्याः पशवः प्रियापरिभवक्लेशोपशान्तिः फलं
राजन्योपनिमन्त्रणाय रसति स्फीतं यशोदुन्दुभिः।।

**द्वितीयो वर्गः**

4. सप्रसङ्ग व्याख्यायताम् - 10

सहभृत्यगणं सबान्धवं
सहमित्रं ससुतं सहानुजम् ।
स्वबलेन निहन्ति संयुगे
न चिरात् पाण्डुसुतः सुयोधनम् ।।





5. निम्नलिखितस्य सप्रसङ्गं व्याख्या करणीया- 10

कुरू घनोरू! पदानि शनैः शनै-
रयि! विमुञ्च गतिं परिवेपिनीम् ।
सुतनु!बाहुलतोपरिबन्धनं
मम निपीड्य गाढमुरःस्थलम् ।।

**तृतीयो वर्गः**

6. ससन्दर्भं व्याख्यायताम् - 10

कृतमनुमतं दृष्टं वा यैरिदं गुरूपातकं
मनुजपशुभिर्निर्मर्यादैर्भवद्भिरूदायुधैः।
नरकरिपुणा सार्धं तेषां सभीमकिरीटिना-
मयमहमसृङ्मेदोमांसैः करोमि दिशां बलिम् ।।

7. ससन्दर्भं व्याख्यायताम् - 10

मातुल! हा धिक्कष्टम् । एष खलु भ्रातुः प्रतिज्ञाभङ्गभीरूः किरीटी मम दुर्योधनराधेयौ शरवर्षैर्दुर्वारैरभिद्रवति। सर्वथा पीतं दुःशासन शोणितं भीमेन। न खलु विषये दुर्योधनानुजस्यैनां विपत्तिमवलोकयितु मनृतमनुमतं नाम मातुल! शस्त्रं शस्त्रम् ।

## चतुर्थो वर्गः

8. भीमसेनस्य चरित्रचित्रणं प्रस्तूयताम् । 10

9. वेणीसंहारस्य नायकः कः? विभिन्न साक्ष्यैरेतन् निश्चयो निर्धातव्यः। 10